श्री ऋषभदेवस्वामिने नमः ।

श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।

श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।

श्री गौतमस्वामिने नमः । श्री सद्गुरुभ्यो नमः ॥

ॐ श्रीँ ह्रीँ अर्हँ नमः ।

आचार्यभगवत्-कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रणीतं

स्वोपज्ञलघुवृत्तिविभूषितं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ॥

[१]प्रणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते ॥१॥

**अर्हँ ।१।१।१॥**

[२]अर्हँ इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ॥१॥

**सिद्धिः स्याद्वादात् ।१।१।२॥**

स्याद्वादाद् अनेकान्तवादात् प्रकृतानां शब्दानां **सिद्धिः** निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ॥२॥

**लोकात् ।१।१।३॥**

अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः सिद्धिर्ज्ञप्तिर्वेदितव्या, वर्णसमाम्नायस्य च ॥३॥ तत्र-

**औदन्ताः स्वराः ।१।१।४॥**

---

१. १।१।१। त आरभ्य ३।२।१५६। पर्यन्तमस्य संशोधने लघुवृत्तेरिमे हस्तलिखितादर्शाः सम्प्रयुक्ताः — पा१,२,३, खं१,२,३, J3 । एषां सर्वेषां स्वरूपं प्रस्तावनातोऽवगन्तव्यम् ॥ २. अर्हमित्ये° खं१, पा१,J3 ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥४॥

## एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ।१।१।५॥

मात्रा कालविशेषः । एक-द्वि-त्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्व-दीर्घ-प्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ , आ ई ऊ ॠ ॡ , ए ऐ ओ औ , आ ३ ई ३ ऊ ३ इत्यादि ॥५॥

## अनवर्णा नामी ।१।१।६॥

अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥६॥

## ॡदन्ताः समानाः ।१।१।७॥

ॡकारावसाना वर्णाः समानाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥७॥

## ए-ऐ-ओ-औ सन्ध्यक्षरम् ।१।१।८॥

' ए ऐ ओ औ ' इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥

## अं-अः अनुस्वार-विसर्गौ ।१।१।९॥

अकारावुच्चारणार्थौ । ' अं ' इति नासिक्यो वर्णः ' अः ' इति च कण्ठ्यः यथासंख्यम् ' अनुस्वार-विसर्गौ ' स्याताम् ॥९॥

## कादिर्व्यञ्जनम् ।१।१।१०॥

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ , च छ ज झ ञ , ट ठ ड ढ ण , त थ द ध न , प फ ब भ म , य र ल व , श ष स ह ॥१०॥

## अपञ्चमान्तस्थो धुट् ।१।१।११॥

वर्गपञ्चमा-ऽन्तस्थावर्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ , च छ ज झ , ट ठ ड ढ , त थ द ध , प फ ब भ , श ष स ह ॥११॥

## पञ्चको वर्गः ।१।१।१२॥

कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्गः स स वर्गः स्यात् । क ख ग घ ङ , च छ ज झ ञ , ट ठ ड ढ ण , त थ द ध न , प फ ब

Jain Education International For Private & Personal Use Only www.jainelibrary.org